पञ्चदशः पाठः

# जयतु संस्कृतम्

(मालकौश रागे)
जयतु संस्कृतं जयतु संस्कृतम्
संस्कृता सुरभारती या, देशगौरवकारिणी
वन्दनीया सेवनीया सर्वदा हितकारिणी।
जगति विश्रुतं तदिह संस्कृतम्, जयतु.........

लोकवेदमयी सुभाषा, रागताललयान्विता,
या चतुः पुरुषार्थदा सा, साधयत्युपयोगिताः
चरतु संस्कृतं पठतु संस्कृतम्। जयतु.........

विश्वमानवधर्मभावम्, एकतां खलु भारते,
वस्तुतः परिरक्षितुं सा, योग्यता भुवि संस्कृते।
अवतु संस्कृतं लसतु, संस्कृतम्। जयतु.........

संस्कृतं सरलं सुबोधं, नैव कठिनं वर्तते,
भाषणं द्रुतलेखनं वा, शीघ्रमेवागम्यते।

सुगमसंस्कृतं सरलसंस्कृतम्।
जयतु संस्कृतं जयतु संस्कृतम्।।

## अभ्यासः

1. देशगौरवकारिणी भाषा का अस्ति?
2. अस्य पाठस्य भावार्थं लिखत।

★★★